# નામરત્નમાલાવલિસ્તોત્રમ્

nAmaratnamAlAvalistotram

sanskritdocuments.org

March 17, 2018

# nAmaratnamAlAvalistotram

# નામરત્નમાલાવલિસ્તોત્રમ્

## Sanskrit Document Information

Text title : nAmaratnamAlAvalistotram

File name : nAmaratnamAlAvalistotram.itx

Category : vishhnu, krishna, puShTimArgIya, nAmAvalI, kRiShNarAya

Location : doc_vishhnu

Author : kRRiShNarAya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# નામરત્નમાલાવલિસ્તોત્રમ્

નત્વા શ્રીવલ્લભાચાર્યાન્નૌમિ શ્રીવિટ્ઠલં પ્રભુમ્ ।
તતઃ શ્રીવલ્લભં સ્તૌમિ તન્નામાષ્ટશતોદિતૈઃ ॥ ૧॥

ઋષિર્નિરૂપિતશ્ચાત્ર વિટ્ઠલેશાત્મજાસુતઃ ।
છન્દોઽપિ ચ તથાઽનુષ્ટુબ્દેવતા ગોકુલેશ્વરઃ ॥ ૨॥

મહાકારુણિકાધીશો બીજં ચાત્ર નિરૂપ્યતે ।
વિનિયોગો ભક્તિયોગે સિદ્ધિઃ સ્વપ્રભુસઙ્ગમઃ ॥ ૩॥

શ્રીવલ્લભાર્યરૂપઃ શ્રીમદ્વિટ્ઠલનન્દનઃ ।
શ્રીવલ્લભઃ સદાનન્દઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૪॥

રુક્મિણીનન્દનઃ શ્રીમાન્ પાર્વતીપ્રાણવલ્લભઃ ।
સર્વસદ્ગુણસમ્પન્નઃ પુત્રવિટ્ઠલરાયયુક્ ॥ ૫॥

પૌત્રગોવર્દ્ધનેશાઢ્યસ્તદતિપ્રીતિકારકઃ ।
સંલાલિતવ્રજપતિર્વ્રજાધીશેક્ષણોત્સુકઃ ॥ ૬॥

પુત્રપૌત્રપ્રપૌત્રદિસમસ્તકુલમોદકઃ ।
ભૂયો નિજકુલાધારઃ સર્વસ્વકુલપોષકઃ ॥ ૭॥

નિજાશ્રિતાખિલજ્ઞાતિપ્રીતિપૂર્વકપાલકઃ ।
યાચનોચિતસમ્પ્રાપ્તપ્રાણિમાત્રપ્રપોષકઃ ॥ ૮॥

સર્વાધારો મહોદારઃ સદાનન્દપ્રવાહવાન્ ।
સમ્પ્રાપ્તપણ્ડિતવ્રાતમાનપૂર્વકદાનકૃત્ ॥ ૯॥

ગોકુલાવાસકર્તા ચ ભૂયો ગોવર્દ્ધને સ્થિતઃ ।
ગોસ્વામી ગોકુલાધીશો ગોપ્રિયો ગોકુલેશ્વરઃ ॥ ૧૦॥

ગોકુલાનન્દકર્તા ચ ગોકુલાધિકભૂષણમ્ ।
ગોવલ્લભો ગોકુલેશો ગોકુલપ્રીતિકારકઃ ॥ ૧૧॥

આચાર્યકૃતસિદ્ધાન્તગ્રન્થવ્યાખ્યાનકારકઃ ।
પિતામહપદાસક્તઃ પિતૃપાદાબ્જભક્તિમાન્ ॥ ૧૨॥

પિતામહસ્વરૂપત્વજ્ઞાપકૈકસ્વનામધૃક્ ।
પિતૃપૂર્ણકરૂપત્વખ્યાપકાત્મસ્થષડ્ગુણઃ ॥ ૧૩॥

અતિમાનુષકર્માદિકૃતિઃ શ્રીકૃષ્ણરૂપધૃક્ ।
ધર્મગ્લાનિકૃતાધર્મનાશનાર્થાવતારવાન્ ॥ ૧૪॥

પાષણ્ડિદણ્ડિસમ્પ્રોક્તપ્રચણ્ડાધર્મખણ્ડનઃ ।
સ્વધર્મસ્થાપકોઽખણ્ડધરામણ્ડલમણ્ડનમ્ ॥ ૧૫॥

યોઽતિકોપિતપૃથ્વીશાકારિતસ્તત્સમીપગઃ ।
ઉલ્લઙ્ઘિતતદીયાજ્ઞઃ સત્યસન્ધો વ્રજે સ્થિતઃ ॥ ૧૬॥

આબાલવૃદ્ધતુલસીમાલાતિલકધારકઃ ।
કાલિન્દીપતિરીશસ્તદ્વિરહાનુભવપ્રદઃ ॥ ૧૭॥

ક્ષ્મેશોક્તિવ્યાજવારાહક્ષેત્રગઙ્ગાસમીપગઃ ।
પુનસ્તદાહુતિવ્યાજત્વરિતપ્રાપ્તગોકુલઃ ॥ ૧૮॥

કાલિન્દીસઙ્ગમોત્સુક્યતદીયવિરહાક્ષમઃ ।
નિત્યં શ્રીગોકુલસ્થાનયમુનારસભોગકૃત્ ॥ ૧૯॥

આનન્દકન્દસન્દોહશૃઙ્ગારરસમૂર્ત્તિમાન્ ।
સર્વેન્દ્રિયસુખાસાધરસરૂપફલાત્મકઃ ॥ ૨૦॥

મુખનિક્ષિપ્તતામ્બૂલચર્વિતારુણસદ્દ્વિજઃ ।
પક્વબિમ્બાધરોઽનન્યભક્તદત્તાધરામૃતઃ ॥ ૨૧॥

સુમુખઃ સુન્દરગ્રીવઃ સુકપોલઃ સુનાસિકઃ ।
સુકર્ણયુગવિન્યસ્તસુવર્ણમણિકુણ્ડલઃ ॥ ૨૨॥

તિલકાતિલસદ્ભાલી રાજીવદલલોચનઃ ।
સ્નિગ્ધનીલાલકવૃતઃ સુન્દરભ્રૂયુગાન્વિતઃ ॥ ૨૩॥

શુભલક્ષણસર્વાઙ્ગસર્વાવયવસૌષ્ઠવઃ ।
સમ્ફુલ્લપદ્મવક્ત્રશ્રીદર્શનાકૃષ્ટભક્તહૃત્ ॥ ૨૪॥

સુસ્નિગ્ધમધુરાલાપો વચનામૃતપોષકઃ ।
મહાકારુણિકાધીશઃ કટાક્ષાકૃષ્ટમાનસઃ ॥ ૨૫॥

ચરણપ્રણતાશેષલોકશરણદાગ્રણીઃ ।
ત્રૈલોક્યાભરણીભૂતઃ સંસારતરણાશ્રયઃ ॥ ૨૬॥

લક્ષ્મીવિલાસનિલયસ્તાતપાદાબ્જસેવકઃ ।
ગિરિધારિપદામ્ભોજસઞ્ચારિભ્રમરાયિતઃ ॥ ૨૭॥

હરિગાનપ્રિયો દાનશીલઃ સન્માનકારકઃ ।
નિત્યોત્સવમનાઃ પ્રીતો વનિતાનયનોત્સવઃ ॥ ૨૮॥

નિજજન્મોત્સવકરઃ સ્વજનાહૃતમઙ્ગલઃ ।
દ્વિજભોજનસુપ્રીતો વ્રજમઙ્ગલદાયકઃ ॥ ૨૯॥

ઋષિપૂજાદિપૂર્વોક્તમઙ્ગલાચારકારકઃ ।
સુવાસિનીસુમુક્તાક્તપાત્રનીરાજનાઞ્ચિતઃ ॥ ૩૦॥

નારાયણકલોત્પન્નરત્નાભરણભૂષિતઃ ।
તત્કુલસ્ત્ર્યઞ્જલિક્ષિપ્તહેમપુષ્પપ્રપૂજિતઃ ॥ ૩૧॥

નિજાલયકૃતાનેકગીતવાદ્યમહોત્સવઃ ।
સુગન્ધિકુઙ્કુમાલેપકારિતાશેષમઙ્ગલઃ ॥ ૩૨॥

મહાનુભાવઃ પરમો ભવ્યમૂર્તિર્મહાદ્યુતિઃ ।
શુભસ્મૃતિઃ શુભધ્યાનઃ શુભકૃન્નામકીર્તનઃ ॥ ૩૩॥

અષ્ટોત્તરશતશ્રીમન્નામમાલેયમદ્ભુતા ।
શ્રીવલ્લભગણેષ્વેવં કૃષ્ણરાયેણ ગુમ્ફિતા ॥ ૩૪॥

ધાર્યા કણ્ઠગતા નિત્યં પ્રભુસઙ્ગરસપ્રદા ।
વિશેષતસ્તુ જપ્યેયં તદીયાનન્યસેવકૈઃ ॥ ૩૫॥

ઇતિ શ્રીકૃષ્ણરાયેણ વિરચિતં શ્રીનામરત્નમાલાવલિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*nAmaratnamAlAvalistotram*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*